विभाषा चेः । (५८/२५२५)

चिनोतेः अङ्गस्य सन्लिटोरभ्यासादुत्तरस्य विभाषा कवर्गादेशो भवति । चिचीषति, चिकीषति । चिकाय, चिचाय । सन्लिटोः इत्येव, चेचीयते ॥

न क्वादेः । (५९/२८७५)

कवर्गादेः धातोः चजोः कवर्गादेशो न भवति । कूजो वर्तते । खर्जः । गर्जः । कूज्यम् भवता । [1]खर्ज्यम्, गर्ज्यम् भवता ॥

अजिव्रज्योश्च । (६०/२८७६)

अजि व्रजि इत्येतयोश्च कवर्गादेशो न भवति । समाजः । उदाजः । व्रजि – परिव्राजः । परिव्राज्यम् । अजेस्तु 'अजेर्व्यघञपोः' (२.४.५६/२२९२) इति वीभावस्य विधानात् ण्यति नास्ति उदाहरणम्[2] ॥

भुजन्युब्जौ पाण्युपतापयोः । (६१/२८७७)

भुज न्युब्ज इत्येतौ शब्दौ निपात्येते पाणौ उपतापे च । भुज्यते अनेन इति भुजः पाणिः । 'हलश्च' (३.३.१२१/३३००) इति घञ् । तत्र कुत्वाभावो गुणाभावश्च निपात्यते । 'उब्ज आर्जवे' (धा.पा. १३०४) । न्युब्जिताः शेरतेऽस्मिन्निति न्युब्जः उपतापः, रोगः । तथैव घञि कुत्वाभावो निपात्यते । पाण्युपतापयोः इति किम् ? भोगः । समुद्गः ॥

प्रयाजानुयाजौ यज्ञाङ्गे । (६२/२८७८)

प्रयाज अनुयाज इत्येतौ[3] निपात्येते यज्ञाङ्गे[4] । पञ्च प्रयाजाः (आश्व. श्रौ. १.४.२) पञ्च अनुयाजाः । त्वमग्ने प्रयाजानां पश्चात् त्वं पुरस्तात् । यज्ञाङ्गे इति किम् ? प्रयागः । अनुयागः । प्रयाजानुयाजग्रहणं प्रदर्शनार्थम्, अन्यत्राप्येवंप्रकारे कुत्वं न भवति । एकादशोपयाजाः (ऐ.ब्रा. २.१.८), उपांशुयाजमन्तरा यजति अष्टौ पत्नीसंयाजा भवन्ति (ऐ. ब्रा. २.३.२), ऋतुयाजैश्चरन्ति (ऐ.ब्रा. २.९.९) इत्येवमादि सिद्धं भवति ॥

वञ्चेर्गतौ । (६३/२८७९)

वञ्चेः अङ्गस्य गतौ वर्तमानस्य कवर्गादेशो न भवति । वञ्च्यं वञ्चन्ति वणिजः[5] । गतौ इति किम् ? वङ्कं काष्ठम् । कुटिलम् इत्यर्थः[6] ॥

---

1. खर्ज्यम् नास्ति ब. 2. चकारोऽनुक्तसमुच्चयार्थः इत्यधिकम् क. ड. 3. शब्दौ इत्यधिकम् क. इ. 4. अभिधेये इत्यधिकम् क, प्रपूर्वस्य अनुपूर्वस्य च यजधातोः इत्यधिकम् फ.ह. 5. वञ्च्यं गन्तव्यं गच्छन्ति इत्यर्थः इत्यधिकम् इ.ड. 6. कौटिल्यम् इह वञ्चेरर्थः इत्यधिकम् क, ननु च वञ्चिर्गतावेव पठ्यते । सत्यमेव तत् । अनेकार्थाश्च धातवः इति इत्यधिकम् इ.ड.ह.